# संस्कृतवार्ता:

दिनाङ्क : 13/01/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य कश्मीरे गंदरबल - जनपदे प्रतिष्ठित - सोनमर्ग - सुरंगः समुद्घाटित:, अनया: परियोजनाया: क्षेत्रे पर्यटनं वर्धिष्यति।
- सैन्य प्रमुखेण जनरल-उपेंद्र द्विवेदिना प्रोक्तं यत् देशस्य उत्तरीय-सीम्नि-स्थितिः संवेदनशीला, स्थिरा च, सैन्यबलं कस्यापि प्रतिकूल-स्थित्यां सम्मुखीकर्तुं सन्नद्धः अस्ति ।
- उत्तरप्रदेशे-प्रयागराजे विश्वस्य बृहत्तमे महाकुम्भे अद्य पौष-पूर्णिमाया: अवसरे सार्ध कोट्यधिक-श्रद्धालव: पवित्र नदिषु स्नानं कृतवन्त: ।
- उत्तर पश्चिम भारते शीतलहरी प्रचलति। भीषण- कुञ्झटिका कारणात् रेलसेवा: प्रभाविता:।
- खो-खो विश्व चषक-प्रतियोगिता अद्य सायंकाले इन्दिरा गान्धी इन्डोर प्रांगणे प्रारप्स्यति।

---

**प्रधानमन्त्री सोनमर्ग**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य कश्मीरे गंदरबल - जनपदे प्रतिष्ठित - सोनमर्ग - सुरंगः समुद्घाटिता: राष्ट्राय च समर्पितः। प्रधानमन्त्रिणा तत्र जनसभा एका अपि सम्बोधिता ।

इत: प्राक् केन्द्रीय-यातायात-राष्ट्रिय-राजमार्गीय मन्त्रिणा नितिन - गडकरिणा च प्रोक्तं यत् पर्यटनेन साकं जम्मू-कश्मीरे स्थानीय-जीवन-यापनमपि अग्रेसरिष्यति। तेन एतदपि भणितं यत् भद्रतम-मार्गै: देशः सुसम्पन्नो भविष्यति। प्रधानमन्त्रिणा सुरंगस्य अभ्यन्तरे गत्वा परियोजनायाः निरीक्षणं विहितम्। सोनमर्ग- सुरंगेण एतेन गंदरबल जनपदे गगनगीर- सोनमर्गस्य च मध्ये यात्राया: समय: न्यूनी करिष्यति। परियोजनाया: एतस्या: क्षेत्रे पर्यटन-सम्पर्क- सुविधा च द्रढयिष्यति। अवसरेऽस्मिन् नितिनगडकरि, डॉ. जितेन्द्र सिंह, जम्मू-कश्मीर राज्यपाल: मनोज सिन्हा, मुख्यमन्त्री उमर अब्दुल्ला, वरिष्ठ- केन्द्रशासित-मन्त्रिण: संसदीय मन्त्रिण:, सुरंग-परियोजनाया: वरिष्ठ अधिकारिण: च उपस्थिता: आसन्।

---------------------------------------------------

सेना प्रमुख

सैन्य प्रमुखेण जनरल-उपेंद्र द्विवेदिना प्रोक्तं यत् देशस्य उत्तरीय-सीम्नि-स्थितिः संवेदनशीला सञ्जाता। तेन भणितं यत् सैन्यबलं कस्यापि प्रतिकूल-स्थित्यां सम्मुखीकर्तुं सन्नद्धा: सन्ति। सीमवर्तिकु क्षेत्रेषु सुदृढ-आधारभूत-संरचनां विनिर्मातुं भारतीय-सेना कृतसकरूपं विद्यते। अथ नवदिल्ल्यां भारतीय सेनाया: वार्षिक-वार्ताहर-सम्मेलने जनरला-द्विवैदिना प्रतिवादितं यत् जम्मू-कश्मीरे स्थितिः नियन्त्रिता, राज्ये च पर्यटनमपि वर्धिष्यति।

तेन भणितं यत् विगत-वर्षे मारितेषु आतंकिषु षष्टि-प्रतिशत पाकिस्तानीयाः आसन् । श्री द्विवेविना भणितं यत् क्षेत्रेऽस्मिन् हिंस्र-घटनासु-न्यूनता समायाता अधुना तत्रत्य जना: शान्तिमिच्छन्ति।

---------------------------------------------------

महाकुम्भ:

विश्वस्य बृहत्तम: आध्यात्मिक-सांस्कृतिक- च समागम: महाकुम्भ: अद्य पौष-पूर्णिमाया: अवसरे उत्तरप्रदेशे-प्रयागराजे अमृत-स्नानेन समं प्रारब्ध:। लक्षाधिका: श्रद्धालव: तीर्थयात्रिण:, आगंतुका: च गंगा-यमुना-सरस्वती सदृश- पवित्र-नदीनां संगम-त्रिवेणी तटे, विभिन्न-घाट-स्थलेषु पवित्र-स्नानं कुर्वन्ति। भव्य-आयोजनस्य- अस्य समापनं फरवरी मासे षड्विंशति-

तारिकायां महाशिवरात्रि-पर्वणि भविष्यति। चतुश्चत्वारिंशदुत्तरैकशतेषु वर्षेषु वारमेकं दुर्लभ-खगोलीय-संयोग: वर्षेऽस्मिन् महाकुम्भस्य वैशिष्ट्यं वर्धिष्यति। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रत्येकस्मै भारतीय नागरिकाय महाकुम्भस्य शुभकामना प्रेषिता। प्रोक्तं च यत् पवित्रोऽयं पर्व विश्वास-सौहार्दपूर्णं च विद्यते।

---------------------------------------------------

<u>लोहड़ी पर्व</u>

अद्य सस्य-संग्रह-काल-सम्बद्धः लोहडीपर्व उत्तरभारते विशेषतया पञ्जाब-हरियाणा हिमाचलप्रदेश दिल्ली जम्मू चण्डीगढराज्येषु आमान्यते। लोहड़ीपर्व शैत्यकालावधेः दीर्घरात्रेः अवसानस्य प्रतीको सहैव दीर्घदिनस्य आरम्भस्य स्वागताय अस्ति। यतो हि अस्मिन् समये सूर्यः उत्तरायणं प्रति वर्धति। अस्मिन् पर्वणि जनाः अग्नेः समक्षं विभिन्नानि नृत्यानि कृत्वा स्वीय-प्रसन्नतां प्रकटीकुर्वन्ति सहैव विभिन्नानि मिष्टान्नानि अपि खादन्ति जनेभ्यश्च दास्यन्ति। राष्ट्रपतिः उपराष्ट्रपतिः च लोहड़ी मकरसङ्क्रान्तिः माघ-बिहू पोङ्ङ्गल-पर्वणाम् अवसरे देशवासिभ्यः शुभकामनाः अपच्छन् । देशस्य पृथक् पृथक-भागेषु इमे उत्सवाः महदुल्लासेन परिपाल्यन्ते। धान्य-सम्बद्धाः इमेः उत्सवाः जनेषु सौहार्दं समेधयन्ति सममेव सामाजिक सद्भावनाम् राष्ट्रिय-ऐक्यं च प्रकटयन्ति ।

---------------------------------------------------

<u>ऋतु विज्ञान:</u>

भारतीय-ऋतु विज्ञान - विभागेन अद्य पञ्जाब-हरियाणा-चंडीगढ़, हिमाचल प्रदेश-ओडिशा-उत्तरप्रदेशस्य बहुषु क्षेत्रेषु अहर्निशं भीषण कुञ्झटिकायाः आच्छादन-अनुमानः अभिव्यक्तः। आगामिषु द्वि-त्रि-दिवसेषु राजस्थान-बिहार-उत्तराखंड-उप-हिमालयीय क्षेत्राणि, पश्चिम-बंगाल, सिक्किम-पूर्वोत्तरीय- राज्येष्वपि यथावत् स्थिते: अनुमानः प्रकाशितः।

राष्ट्रिय-राजधानी-क्षेत्रे दिल्ल्यां कुञ्झिटिकायाः कारणात् दृश्यता न्यूनीयूता भविष्यति, एतस्मात् कारणात् बहवः रेल यानानि विलम्बेन प्रचलन्ति। रेल- विभागानुसारेण दिल्लीं प्रति आगम्यमनि-द्वादश-रेलयानानि विलम्बेन प्रचलन्ति।

---------------------------------------------------

प्रधानमन्त्री-ऋतुविभागः

देशं ऋतुसज्जं जलवायु-गुणवत्तापूर्णं च राष्ट्रं कर्तुं प्रधानमन्त्री नरेन्द्रमोदी श्वः 'मिशनमौसम' इत्यस्य आरम्भं करिष्यति। अत्याधुनिक-ऋत्वावलोकन- प्रौद्योगिकीनां प्रणालीनां च विकासेन, उच्चसंकल्पयुत-वायुमण्डलीय-निरीक्षणं, नवीनक्षमतायुताः रडार-उपग्रहाः, उच्च-प्रदर्शन-सङ्गणकाः च योजयित्वा एतत् प्राप्तुं अभियानस्य उद्देश्यम् अस्ति श्रीमोदी नवदिल्ल्यां भारतऋतुविभागस्य सार्धैकशत तमे स्थापनादिवसस्यावसरे भागं गृहीत्वा अस्य प्रारम्भं करिष्यति।

---------------------------------------------------

पीएम-महाराष्ट्रयात्रा

प्रधानमन्त्री नरेन्द्रमोदी महाराष्ट्रे बुधवासरे मुम्बईनगरस्य नौसेना डाकयार्ड इत्यत्र नौसेनायाः त्रीणियुद्धपोतानि आईएनएस सूरतः, आईएनएस नीलगिरी, आईएनएस वाघशीरः च राष्ट्राय समर्पयिष्यति। त्रयाणां प्रमुख-नौसैन्ययुद्धपोतानां संयोजनेन रक्षानिर्माणे सागरीयसुरक्षायां च वैश्विकनेतृत्वस्य भारतस्य दृष्टिकोणं सम्पूरयितुं महत्त्वपूर्णं पदाक्षेपः भविष्यति।

---------------------------------------------------

दिल्ल्युच्च - न्यायालयः

दिल्ल्युच्च न्यायालयेनाद्य आम-आदमी-पार्टीति-नेतृत्व-युतं दिल्ली- प्रशासनं मदिरा - प्रवञ्चना-प्रकरणे नियन्त्रक-महालेखा-परीक्षक-CAG- इत्यस्य विवरणं विधानसभा-अध्यक्षाय समर्पणे विहित-विलम्बमालक्ष्य प्रश्नमुत्थापितम् । प्रवञ्चना-प्रकारणे अस्मिन् पूर्वमुख्यमन्त्री अरविन्द-केजरीवालः, वरिष्ठ-नेता मनीष सिसोदिया च निगृहीते आस्ताम् ।

---------------------------------------------------

CDS-NCC

प्रमुखेण रक्षा- अध्यक्षेण जनरल अनिल-चौहानेन अद्य देशस्य युवजनाः सप्तचत्वार्रिंशदुत्तर-द्विसहस्रतमं वर्षं यावत् भारतं विकसित राष्ट्र-निर्माणे महत्त्वपूर्ण-भूमिका निर्वाहयिष्यन्ति । अद्य

नवदिल्ल्यां राष्ट्रिय- कैडेटकोर, NCC शिविरे युवा NCC कैडेट जनाः सम्बोधयन् असौ भणितवान् यत् अशेष-वर्षे जनरल - चौहानेन बहवः सुधारात्मक- प्रशंसनीयाः पदक्षेपाः उत्थापिताः सन्ति।

---

**खो-खो/विश्वचषक**

**प्रवर्तमानवर्षीय खो-खो विश्वचषक प्रतियोगिता अद्य सायंकाले नवदिल्ल्यां इन्दिरा गान्धी इन्डोर क्रीडाङ्गणे प्रारप्स्यते।**

।। इति वार्ता:।।